# Kalabhairava Ashtakam

Sanskrit · Devanagari source script · Latin rendering available

देवराज्यसेव्यमानपावनाघ्रिपंकजम्
व्यालयज्ञसूत्रमिंदूशेखरं कृपाकरम्।
नारदादियोगिवृंद वंदितं दिगंबरम्
काशिकापुराधिनाथ कालभैरवम् भजे।

devarājyasevyamānapāvanāghripaṃkajam
vyālayajñasūtramiṃdūśekharaṃ kṛpākaram|
nāradādiyogivṛṃda vaṃditaṃ digaṃbaram
kāśikāpurādhinātha kālabhairavam bhaje|

भानुकोटिभास्करं भवाब्दितारकं परं
नीलकण्ठमीप्सिथार्थदायकं त्रिलोचनम।
कालकालमम्बुजाक्षमक्षशूलमक्षरं
काशिकापुराधिनाथ कालभैरवम् भजे।

bhānukoṭibhāskaraṃ bhavābditārakaṃ paraṃ
nīlakaṇṭhamīpsithārthadāyakaṃ trilocanama|
kālakālamambujākṣamakṣaśūlamakṣaraṃ
kāśikāpurādhinātha kālabhairavam bhaje|

शूलटंकपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम।
भीमविक्रम प्रभुं विचित्र तांडवप्रियं
काशिकापुराधिनाथ कालभैरवम् भजे।

śūlaṭaṃkapāśadaṇḍapāṇimādikāraṇaṃ
śyāmakāyamādidevamakṣaraṃ nirāmayama|
bhīmavikrama prabhuṃ vicitra tāṃḍavapriyaṃ
kāśikāpurādhinātha kālabhairavam bhaje|

भुक्तिमुक्तिदायकं प्रशस्तलोकविग्रहं
भक्तवस्तलं स्थितं समस्तलोकविग्रहं।
विनिकण्वन्मनोज्ञ्हेम्किंकिणीलस्तकटिं
काशिकापुराधिनाथ कालभैरवम् भजे।

bhuktimuktidāyakaṃ praśastalokavigrahaṃ
bhaktavastalaṃ sthitaṃ samastalokavigrahaṃ|
vinikaṇvanmanojñhemkiṃkiṇīlastakaṭiṃ
kāśikāpurādhinātha kālabhairavam bhaje|

धर्मसेतूपालकं त्वधर्ममार्ग्नाशकम्
कर्मपाशमोचकम् सुशर्मदारकम् विभुम्।
स्वर्णवर्णशेष्पाशशोभितांगमण्डलं
काशिकापुराधिनाथ कालभैरवम् भजे।

dharmasetūpālakaṃ tvadharmamārgnāśakam
karmapāśamocakam suśarmadārakam vibhum|
svarṇavarṇaśeṣpāśaśobhitāṃgamaṇḍalaṃ
kāśikāpurādhinātha kālabhairavam bhaje|

रत्नपादुकाप्रभाभिरामपादयुग्मकम्
नित्यमद्वितीयमिष्ट दैवतं निरंजनम्।
मृत्यु दर्प नाशनं करालदंष्ट्र मोक्षणम्
काशिकापुराधिनाथ कालभैरवम् भजे।

ratnapādukāprabhābhirāmapādayugmakam
nityamadvitīyamiṣṭa daivataṃ niraṃjanam|
mṛtyu darpa nāśanaṃ karāladaṃṣṭra mokṣaṇam
kāśikāpurādhinātha kālabhairavam bhaje|

अट्टहासभिन्नपद्मजाण्ड्कोशसंततिं
दृष्टिपातनष्टपापजालमुग्रशासनं
अष्टसिद्धिदायकं कपालमालिकाधरं
काशिकापुराधिनाथ कालभैरवम् भजे।

aṭṭahāsabhinnapadmajāṇḍkośasaṃtatiṃ
dṛṣṭipātanaṣṭapāpajālamugraśāsanaṃ
aṣṭasiddhidāyakaṃ kapālamālikādharaṃ
kāśikāpurādhinātha kālabhairavam bhaje|

भूतसंघनायकं विशालकिर्तीदायकं
काशिवासलोकपुण्यपापशोधकं विभुम्।
नितिमार्गकोविदम् पुरातनम् जगत्पतिं
काशिकापुराधिनाथ कालभैरवम् भजे।

bhūtasaṃghanāyakaṃ viśālakirtīdāyakaṃ
kāśivāsalokapuṇyapāpaśodhakaṃ vibhum|
nitimārgakovidam purātanam jagatpatiṃ
kāśikāpurādhinātha kālabhairavam bhaje|

कालभैरवाष्टकम् पठन्ति ये मनोहरं
ज्ञानमुक्ति साधनम् विचित्रपुण्यवर्धनम्।
शोकमोह्दैन्यलोभकोपताप्नाशनम्
प्रयान्ति कालभैरवांघ्रिसन्निधिम् नरा धृवम्
काशिकापुराधिनाथ कालभैरवम् भजे।

kālabhairavāṣṭakam paṭhanti ye manoharaṃ
jñānamukti sādhanam vicitrapuṇyavardhanam|
śokamohdainyalobhakopatāpnāśanam
prayānti kālabhairavāṃghrisannidhim narā dhṛvam
kāśikāpurādhinātha kālabhairavam bhaje|

---

## Source & edition

Complete selected Sanskrit Wikisource poem block; source opening/closing lines and spellings are preserved. Segment grouping is added for reading. No English meaning is supplied for this edition.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. कालभैरवाष्टकम्, revision 56881. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-56881-abe297f0f4.